रघुदेवमिश्र-विरचिता

विरुदावली

(शाहजहां-नृपतेः प्रशस्तिपरकेत्यनुश्रुतिः)

●

सम्पादकः

डा० जगन्नाथ पाठकः

●

शोधपत्रिकायाः चतुस्त्रिंशत्तमाद् भागात् (१९७८ : १–२)
अनुमुद्रिता

●

रघुदेवमिश्र-विरचिता

विरुदावली

(मुग़लसम्राज्-शाहजहाँनृपतेः प्रशस्तिपरं विरुदकाव्यम्
इति सम्प्रदायः)

सम्पादकः
डा० जगन्नाथ पाठकः

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरू पार्क
प्रयाग-२

प्रकाशक :
डा० गया चरण त्रिपाठी
प्राचार्य,
गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ
मोतीलाल नेहरू पार्क
इलाहाबाद–२

मूल्यम्

Reprinted from the Journal of *Ganganatha Jha Kendriya Sanskrit Vidyapeetha*, Vol. XXXIV, No. 1–2

FOREWORD

भुजवनतरुच्छायां येषां निषेव्य महौजसां
जलधिरशना मेदिन्यासीदसावकुतोभया ।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥

—कल्हणस्य

The present treatise is a companion volume, so to say, to our previous publication *Jahāngīra Virudāvalī* which appeared in 1978. The author of the present work, Pt. Raghudeva Miśhra is said to be the younger brother of Harideva Miśra.

However, whereas Pt. Harideva has clearly mentioned the name of his Patron, Pt. Raghudeva is completely silent about the king for whom he has composed this work. It is only in the comparatively recent Mithila tradition that the subject of the Virudāvalī has been identified with the emperor Shahjahan. This seems likely, though not certain. It is really strange that the author composes about one hundred big and small poems in praise of a king whom he never cares to mention in his work! Or could it be intentional?

The present Virudāvalī has been composed and modelled much on the pattern of the Jahāngīra Virudāvalī. The work of the elder brother seems to have been the inspiration behind the work of the younger brother.

The present (Shāhjahān) Virudāvalī was first published in 1903 in Varanasi with the commentary of Shri Cakradhara Sharma, a contemporary, Maithila Pandit. The *Hindi Sāhitya Sammelana* of Allahabad possesses a manuscript of (Shāhjahān) Virudāvalī with the commentary of Kṛṣṇadatta. On closer scrutiny it has been found that Pt. Cakradhara

Sharma utilized the older commentary of Kṛṣna Datta for writing *his* commentary in the beginning of this century. His commentary not only very closely follows the commentary of Kṛṣṇadatta but is even identical with it at places. For this reason it has not been considered useful to print the commentary of Kṛṣṇadatta here along with the text. However, Dr. Pathak has made full use of the MS of the Sahitya Sammelan in critically editing the text and thereby improving upon the readings given by Pt. Chakradhara Sharma.

I am sure that the scholars shall welcome the publication of this *Virudāvalī* since it is a rare specimen of its kind as good as its counterpart, the *Jahangira Virudāvalī*.

Dr. G. C. Tripathi
Principal

G. N. Jha K. S. Vidyapeetha
Allahabad—2
July 27th, 1979.

रघुदेवमिश्र-विरचिता

विरुदावली

[१]

कलकङ्कणलम्बितचन्दनचुम्बितचारुचतुर्भुजभीमबले
हिमशैलशिखण्डिनि वैरिविखण्डिनि कुण्डलमण्डितगण्डतले ।
दलदञ्जनगञ्जिनि भवभयभञ्जिनि मञ्जुलमणिमयमुकुटवरे
पञ्चाननचारिणि शशधरधारिणि जय जय जननि जयन्ति परे ।।

[२]

त्वद्यानोद्यमहृद्यनर्दितहयोद्रिक्ताद्रिधातुद्रवे
दर्पान्धद्विरदान्धकारिणि भवे सन्ध्यानुसन्धायिनः ।
पिण्डीकृत्य दिशो दशोदितयशोहिण्डीर हे वीर ते
चण्डीभर्तुरकाण्डताण्डवविधिः खण्डीकरोतु द्विषः ।।

[३]

जय घनचारुचिकुर[1]चपलारुचिचम्पक
सुमुकुट वैर[2]वलितनवकैरवकम्पक ।
गुणगणशालिकनकसदृशालिकरोचन
मृदुकुरुविन्दविदलदरविन्दविलोचन ।।
कमलविगानकुशलसुभगाननमण्डल
विमलकपोलयुगलकृतदोलनकुण्डल ।
समुदितघोण तरणिकरशोणतराधर
ललितरदालिदलितवरदालिम[3]कादर ।।
मदकलहंसवचन बृहदंसवसुन्धर
हृदुपमतुङ्गबलवदतिपुङ्गवकन्धर ।
गलतलकम्बुजनितचलदम्बुजडम्बर
वलयितहारविततबहुतारहृदम्बर ।।

'श्रीगणेशाय नमः । कृष्णाय नमः' इति लिखित्वा लिपिकर्त्राऽऽरम्भः कृतः ।
१. °रुचिर° । २. वैरि° । ३. °दाडिम° ।

पृथुभुजतालतरलकरवालविलेशय
मणिसरहेलिमिलितकरकेलिकुशेशय ।
नखरमयूखमुषितकरभूषण कामद
भृशकृशतुन्दशमितहरिसुन्दरतामद ॥
त्रिवलितरङ्गमदनमणिभङ्गमनोहर
जगदीविलोमवलितलिपिलोमलतोदर ।
विगुणविहीन जघनघनचीनचयावृत
करिकरभानुकरणकरजानुविराजित ॥
समतमजङ्घ गमनगजसंहतिलङ्घन
पदभयभीरुसरससरसीरुह नन्दन ।
भवदवसन्नतरुणरिपुसन्नतसन्नख
लसदशरीरविधुर वरवीर विकलमष ॥
कान्तकलिका

[४]

पृथ्वीपाल प्रयाति प्रभवति भवति भ्रष्टकोटीरहीराः
काश्मीराभीरवीरा वनभुवि बहुशो बद्धचीरा विशन्ति ।
युष्मत्कोदण्डचण्डध्वनिरिति परितो वीतभद्रा न मद्रा
निद्रायन्ते दिगन्तेष्वपि मुदिरगुरुध्वानरुद्धाननेषु ॥
शूरश्लोकः

[५]

जय जय हीनप्रमुदितदीन क्षितिधरलीन-
स्वचकितचीन स्फुरितनवीनध्वनिजितवीण ।
प्रतिहतमीनध्वज सुकुलीन प्रसरदहीन-
प्रतिभटपीनद्युतिभुज वीणप्रखरधुरीण ॥
वीरविरुदम्

[६]

जय बलदेवालम्बितवलवल देवालं
कृतकुमुदेवालङ्कृतसुस्मित विस्मित ।
परनरदेवाराधितबहुविधसेवासाधित
सुरपतिरेवासि प्रियपण्डितमण्डित ॥

---

१. जगदनु° ।

[७]

जय जय मेदिनीकामिनीकर्णाभरण कर्णाटलाटचार्वाट-[1]
चेदिचीनचोलचम्पादिचतुस्समुद्रान्तचक्रवर्तिचक्रचूडा-
मणिचुम्चुचञ्चलचिकुरचञ्चुरचञ्चरीकसञ्चय-
सञ्चारचारुचरणारविन्द मुखचन्द्रचन्द्रिकाञ्चन-
चलितचकोरलोचनाचित्तचन्द्रकान्त कान्त ॥

[८]

ग्रहितशरीरप्रणिहितचीर प्रचुरपटीरच्छुरितकुटीर ।
स्फुटकरवीरद्युतिकर वीरक्षितिपतिहीर प्रकृतिगभीर ॥
कान्तकलिका

[९]

पृथ्वीजाने प्रयाणे तव पणववनानर्घ्य[2]निर्घोषदोषा-
दुज्झन् हिण्डीरपिण्डीं दिशि विदिशि लुठल्लोलकल्लोलबाहुः ।
सद्यः संत्रस्तवेलातलनृपतिशतोपाहृतोपान्तरत्न-
व्रातो जातो नु जाने वसुविगमशुचा वातकी वारिराशिः ॥

[१०]

भिल्लीवल्लीपरिगतरिपुगण मल्लीवल्लीसुरभितपरिजन ।
भल्लीहल्लीसकशतकृतयमचिल्लीसल्ली[3]लक सुरतरु[4]सम ॥
वीरविरुदम्

[११]

पारोदकतटपारोदितविटपारोहितभट शोचनमोचन ।
धारोपमवसुधारोहित वसुधारोहणक सुलोचन रोचन ॥
हारोदितपर हारोदितपर हारोपितशरशिञ्जनसञ्जन ।
तारोदयनवतारोदयदवतारो भयलवभञ्जन रञ्जन ॥
मारोपमसुकुमारोपम सुकुमारो जय जय संयति चञ्चति ।
चारोपचितविचारोऽसुहृदभिचारो भवसि न कम्प्रति सम्प्रति ॥
चारो जगदुपचारोचितसुरुचा रोचितजन दायकनायक ।
सारोपनतमसारो घनतमसारो रिपुगणशायकसायक ॥

---

१. कार्णाटचार्वाट° । २. °नर्घ° । ३. °भिल्ली° । ४. सुरतनु° ।

हारोपलसदुदारोपलमृदुदारो गुरुयदुनन्दनवन्दन ।
नारोचनघनसारोऽत्र न मनसा रोपण घनचन्दननन्दन ॥
व्यालोलितमहिपालोऽहितशिशुपालोपचरणपण्डितमण्डित ।
तालोपमितभुतालो जलधिसुतालोकित खलखण्डितचण्डित ॥
कालोपमकरवालो विमलप्रवालोपसरदशर्मद शर्मद ।
भालोदितमणिभालोभित[1]सुसभालोलुपनृप निर्मद नर्मद ॥
मालोपसृत तमालोपमततमालो मलयजशीलकशीलक ।
सालोपहितरसालोपवन रसालोक विपुलकीलककीलक ॥
जालोदरसुखजालोदय सुभुजालोचन धृतिभावुकभावक[2] ।
नालोचकगलनालो मृदितमृणालो मृदुरिति शावकपावक ॥
मालोदितसुविशालोपमसुदृशालोचितचरणाभरणाकर ।
कालोहिरिव करालो भवसि करालोलित[3]नरनाथ रणादर ॥

कान्तकलिका

[१२]

क्षोभक्षीणारिकीनाशक सकलमहीनाथ मीनाङ्करीणा-
धीनादीनानिलीना इव सुखसरिति स्वेदसम्भिन्नचीनाः ।
वीणाविन्यासपीनायतजघनतटोद्गानतानप्रवीणाः
स्वर्गमीणा नवीना मदगजगमनास्त्वद्गुणानुद्गृणन्ति ॥

शूरश्लोकः

[१३]

रिपुरुण्डचयमुण्डमयखण्डहुतिकुण्ड जगदण्डततखण्डखल-
दण्डपटुषण्ड भुजदण्डभरपण्ड[4]पर चण्डतरतुण्डगजगण्डयुग-
मण्डलविखण्डन[5]वितण्ड सशिखण्डशशिखण्डततमण्डपतरण्ड ॥

वीरविरुदम्

[१४]

जय जय जगदेकरक्षासदृक्षातिदक्षा यदृच्छाजिशिक्षासुदक्षासितक्षाहतक्षामरक्षा ऋभुक्षा इव क्षात्रकक्षाविलक्षारिपक्षालिकक्षालितक्षारित[6]क्ष्मातलः ।

पिशुनपशुविनाशदीक्षाविचक्षणकक्षानल क्षाय[7]भिक्षाविवक्षानपेक्षातिलक्षाभिमोक्षार्दितक्षारुरुक्षान्ययक्षादिरक्षान्तपक्षान्तसोच्छ्रायदाक्षायणीदक्षिणः ।

---

१. °लोदित° । २. °भावकपावक । ३. °लोचित° । ४. °भण्ड° ।
५. °विखण्डल° । ६. °च्छालित° । ७. °च्छाय° ।

क्षणमपि न विशङ्कयक्षो यियक्षो युयुक्षो तदक्षोलवृक्षोदकक्षोदकक्षोरुकक्षोर्विभक्षोप[१]दक्षोऽसदृक्षो दिदृक्षोपगक्षोणिपक्षोन्नतक्षोणिभृच्छोकविक्षेपकः ।

करिकरकदलीसपक्षोरुकक्षोरुवक्षोरुडक्षोऽन्तरिक्षोत्थवृक्षो[२]ऽसि भिक्षोर्जिघृक्षोर्दिविक्षोस्तरक्षोरपि क्षोभदक्षो दुरीक्षो मृदुक्षौमगुच्छो रिपुक्षोदिकौक्षेयकः ।

जय जय गिरिधातुमुद्रामिलद्रागभद्राति[३]भद्रापतद्रामजिद्राम भद्राय निद्रादरिद्राक्ष विद्राजिसद्राय[४]मुद्राशुगद्रागतिद्राघिमद्राववविद्रावितद्राविलः ।

स्फुटमसि करुणासमुद्रो निरुद्रो विनिद्रोपलद्रोऽसकृद्रोचन[५] द्रोणजद्रोणसद्रोप[६]मद्रोपमद्रोहिहृद्रोगकृद्रोपरुद्रो गुणद्रो भवद्रोकचिद्रोम नोद्रोहतु[७] ।

विचिकिलचयच[८]ञ्चदुद्यानमुद्यानदद्यान[९]वद्यान पद्यादिगद्यादृत[१०] द्यारिमुद्यासिमद्या विमृग्याजिमद्यापि सद्यावनद्याभपद्यावदुद्यातविद्याधराद्यार्चित ।

त्वमिव जगति कोऽनवद्योरुहृद्योऽसुहृद्योषिदुद्योतकृद्योगभिद्योऽ[११]यमुद्योगविद्यो निरुद्योऽनिषद्योदरद्योतिमद्योऽसमद्योततलद्योतविद्योडुवद्योधचञ्चद्यशाः ।

त्यजति तव तुरङ्गकङ्काङ्घ्रिटङ्कातिटङ्कारशङ्काकरं कातलं[१२]कादलङ्कारशङ्कारकं काकरङ्काभरङ्काचिरं कालकङ्कालसङ्काशलङ्काभृदङ्काधिरूढा वधूः ।

तव कलयति नो त्रिपङ्कोऽपि रङ्को निरङ्कोऽतिशङ्को निशं कोऽतिशङ्को दृशां कोणसङ्कोचिरङ्को शशाङ्कोदयं कोविदं कोटिदं कोमलं कोपन कोपपङ्कोद्भवाभं मुखम् ।

जय जय जितकीरविन्दारविन्दास्य विन्दानुविन्दाभ विन्दामलं दारकं दारुवृन्दारवन्द्याहितं दाम मन्दारकुन्दालि[१३]सन्दालितं दापयन् ।

भवति सति हतारिविन्दोऽचिरं दोरमन्दोरुहिन्दोलवृन्दोढमन्दोऽयमिन्द्रोऽपि सन्दोग्धि निन्दोचितं दोषमिन्दोरलं दोह[१४]सन्दोहकन्दोच्चकीर्तिद्युतेः[१५] ।

विलसति शमयन् शरव्यान् मृगव्यानुगव्याधनव्यानलव्यानटव्यामटव्याभिपव्याखिलव्यापि[१६]सव्यापसव्याशुगव्यापृतिव्याकुलव्यालभव्याधिकव्यायतस्ते भुजः ।

परकमलतुषारपव्योऽसि गव्योढहव्योऽतिकव्योऽवितव्योरुकव्योघ दिव्योदयव्योषधिव्योषनव्योटितव्यो[१७]पजीव्यो जितव्योमजव्योघरव्योष[१८]सेव्योऽपसव्यो भवान् ।

खरतरशरसंघात[१९]सम्पातशम्पासकम्पा भृशं पाकलम्पाकचम्पा सुझम्पानुझम्पानुकम्पाकरं पालिपम्पावनं पावनं पारगं पादपम्पादसम्पातसम्पादितातिश्रमिः ।

---

१. ˚विभुच्छो˚ । २. ˚कक्षो˚ । ३. ˚तद्राति˚ । ४. ˚मद्राम˚ ।
५. ˚महृद्रोचन˚ । ६. ˚मद्रोप˚ । ७. नोद्रोहहेतु । ८. ˚किलचञ्च˚ ।
९. ˚मुद्यानवद्यान । १०. ˚हृत । ११. ˚गमुद्यो˚ । १२. करंकादलं˚ ।
१३. ˚कुन्दादि˚ । १४. द्रोह˚ । १५. ˚द्युते । १६. ˚व्यापितव्यापि˚ ।
१७. ˚व्योचितव्यो˚ । १८. ˚योप उव्योंऽप˚ । १९. ˚जात˚ ।

भवति चलति शत्रुशम्बाभ किं बाऽधिकं बाधितं वाच्यमम्बानितम्बावलम्बाद्-
विलम्बावहं वारिसंवाह्यलम्बालकं वालकं वालिशं वाटजम्बालसंबाधविम्बाधरं धावति ॥
कान्तकलिका

[१५]

अक्षीणक्षणदाकरानन रणक्षेत्रक्षणैकक्षत-
क्षत्रक्षोणिजलक्षलक्षलुठनक्षामोऽसि चक्षुःश्रवाः ।
पीत्वाऽपि क्षतजान्यरिक्षितिपतिक्षोरक्षमेभक्षरद्-
दानं दिक्षु विदिक्षु सक्षुध इव क्षिप्रं तवाचामति ॥
शूरश्लोकः

[१६]

जय हिमधामप्रभरतिधामस्वयुवतिभामक्षितिपर
कामप्रतिम ललामद्युतिमयदाम प्रतिरथनाम
प्रमथनराम द्विपदभिरामद्विरदविराम ॥
धीरबिरुदम्

[१७]

दम्भारम्भामितबलसम्भारं भाधिकबल[1]-
जृम्भासम्भावितललनाजनभाजन ।
रम्भास्तम्भाहिततुल[2]रम्भालम्भादरिकुल-
सम्भारं भावय कनकासनभासन ॥
रन्ता दन्तावलकुल[3]दन्ताहन्ता नतजनचिन्ता-
चिन्तामणिरसिमण्डलदण्डल ।
यन्ता मन्तावपि हरिदन्तागन्ता हृतकरि-
कुन्तासन्तालित चलकुण्डलमण्डल ॥
भङ्गासङ्गाकुलतरवङ्गानङ्गाहितपर
गङ्गा[4]सङ्गाहनपर बन्धुरकन्धर ।
रङ्गादङ्गानुपतित[5]भृङ्गायं गामव हृत-
तुङ्गारि गारुडमणिसुन्दरमन्दिर ॥
स्कन्धावन्धादधिरण[6]सिन्धावन्धा-

---

१. °रण° । २. °तल° । ३. °गण° । ४. सङ्गा° । ५. °दनुकृत° ।
६. °दतिरण° ।

धिव चण[1]सन्धानं धारितगुण तारणकारण ।
गन्धादन्धा[2]पतदलिविन्ध्यावन्ध्याहृतकलि-
सन्धासन्धावितवरवारणदारण ॥
शिञ्जाशिञ्जाहितभयगुञ्जापुञ्जावृतिमय-
कुञ्जालञ्जागरितमहानसिमानसि ।
कञ्जा[3]खञ्जामलदलसञ्जातं जालक-
विवरं जारं जामिभिरभि[4]विन्दसि निन्दसि ॥
किञ्चायं चामरयुगमञ्चामुञ्चाभरण-
गणं चापं चापलशर गर्भय निर्भय ।
पञ्चालं चारणकृतसञ्चारं चासुवलित-
चञ्चामञ्चायितमिह कल्पय कल्पय ॥
कान्तकलिका

[१८]

नृत्यन्ती नवमल्लिवल्लिसुमनोदामा[5]भिरामाकृति-
स्त्वत्कीर्तिर्भ्रमणीशतानि धरणीचक्रेश चक्रे मुहुः ।
तस्या एव चिरं चरन्ति चरणव्यापारचिह्नोच्चया-
श्चण्डीशाचलचन्द्रवन्दनवनीमन्दाकिनीविभ्रमम् ॥
शूरश्लोकः

[१९]

भङ्गदूनबङ्गहूण रङ्गलूनचङ्गसूनदामतल्प कामकल्प नाम जल्पतामनल्पकक्ष देववृक्ष[6] एव लक्ष्यसे[7]ऽवलक्षसेव गण्डपालिमण्डितालिगन्धशालिसिन्धुरालिकुम्भदेश-दम्भलेशगञ्ज केशमञ्जुवेश ॥

वीरविरुदम्

[२०]

चतुरङ्गतुरङ्गतुरङ्गमसङ्गमचङ्गिमभङ्गिमदङ्गमये कृतबङ्गजये ।
मदसिन्धुरसिन्धुरबन्धुरबन्धुरणैकधुरन्धरकन्धर ए गजबन्धनये ॥
परकुञ्जरकुम्भतटस्फुटन[8]स्फुटरत्नविभूषितभूदयिते सुखसंवलिते ।
परिपन्थिनरेशनितम्बिनिकेशनिवेशनपेशलशोणकरेऽतुलतोणधरे ॥

१. तल° । २. °नन्धा° । ३. कञ्जारख° । ४. °जामितिरति° ।
५. °माला° । ६. °कक्ष । ७. लक्षसे । ८. °त्रुटन° ।

परिभूतकुलूतकलत्रकलापविलापविलापकचापघने ललितापघने ।
शिशिरोपमरोपभरोदय[1]भिन्नविरोधिशिरोधिसरोजवने समरोढगुणे ।।
धरणीभृदनीचमणीचयवीचिमरीचिझरीचितचारुनखे सुररा[2]जसखे ।
गलदुज्ज्वलहारतुषारसुधारसुधारसधामसनाभिमुखे सुजनाभिमुखे ।।
करभोरुकपोलविलोलविलोचनलोनक[3]लोपकलोपगते सकलोपनते ।
परिफुल्लपयोजपयोजपयोधिपयोधिकशोभियशोऽधिगते जितयोधिशते ।।
मृदुकेतकपर्णसुवर्णसुवर्णभवन्नवकर्णवतंसकले सततं सबले ।
रसमूढसमूढचमूभिरमूलितधूलिदुकूलितदिङ्महिले विनयग्रहिले ।।
मदकुम्भिकदम्बसदम्बुदलम्बनलम्भितसम्भ्रमजम्भरिपो सुललाटलिपौ ।
हतलक्षविपक्षनृपक्षतजोदकसेकसशोभयशोलतिके जगदभ्यधिके ।।
रणमण्डलपण्डनृकुण्डलमण्डलतुण्डविखण्डनचण्डगजे जितशुण्डभुजे ।
त्वयि देव दरिद्रसुरद्रुम भद्र समुद्रसमुद्रमहीमहिते कमला रमते ।।

कान्तकलिका

[२१]

प्रस्थाने तव वाजिराजिचरणक्षेपक्षणक्षोभित-
क्षोणिक्षोदकृतक्षपे समुदितक्षत्रक्षयप्रत्ययाः ।
वारं वारमुदारवारणघटागण्डस्थलप्रोच्चल[4]-
न्मत्तालिध्वनितालिका विदधते हृष्टा इवाष्टौ दिशः ।।

शूरश्लोकः

[२२]

बालाहित करवालाहितकर मालासित सुख[5] मालासितसुख[6]
भालालकतमभालालकतम हालापनरसहालापनरस ।।

वीरविरुदम्

[२३]

त्वं गाधिजमति बङ्गाधिपतति भङ्गाकुलमतिरङ्गावनिपतिसङ्गापितबल भृङ्गा-कुलितलवङ्गालय चतुरङ्गातिचलतुरङ्गाभिहतपतङ्गायितसुपतङ्गाकलय सुखं गामधिक-सुरङ्गाधरमणिरङ्गावजितनिरङ्गादिमद भुजङ्गायतभुज गङ्गासुतरणरङ्गाधिकचण गङ्गातरलतरङ्गाहतिरतसङ्गादित[7]हर गङ्गाधरधरभृङ्गादपि शतभृङ्गादपि वत

---

१. °रोपमरोपभरोदय° । २. सुखरा° । ३. °रोचक° । ४. °प्रोच्छल° । ५. मुख । ६. °मुख । ७. °हित° ।

तुङ्गातिमदमतङ्गालिमयमृदङ्गारवनटदङ्गाहितभट रिङ्गारिकुल[1]कुरङ्गातप बहुलं गाढभ-यकलिङ्गाधिपवकसङ्गामकरणलिङ्गापहरण चङ्गाकृतिरतरङ्गालस हतशृङ्गाखिलखल-शृङ्गारितदल शृङ्गायित[2]धनुरङ्गारकतनुरङ्गारसमनिषङ्गासित[3]णिसङ्गातु[4]रसुपिसङ्गा-हितकपिसङ्गाहितशरभङ्गाश्रम परमं गारुडशिलभृङ्गारसुजल पङ्गावपि सषडङ्गाहित मुखपिङ्गाभरण विहङ्गाभरणत्रिभङ्गारभस भूजं गाहितविभुटङ्गा[5]भिहतपरं गालवतपसं गायनसुखदं गात्रजसुषमं गालितविपदङ्गाधिकसुपदं गाहितसबलं ग्रामितभुवनं गापय निजभङ्गाहृतगज ।

कान्तकलिका

[२४]

उद्घाटचोद्घाटच घाटातटमटति नटन्नुद्भटं टापटङ्क-
प्राकटचस्फुटचमानस्फटविकटमटत्कारकोटिस्फटीशः ।
लाटीलुण्टाकघण्टाघटघटितपटूद्घुष्टपुष्टाङ्गचेष्टा-
विश्लिष्टस्पष्टनष्टप्रतिभटपटलत्रोटको घोटकोऽयम् ॥

शूरश्लोकः

[२५]

वारितरवारितरवारिदरकारिशरसन्तते
सारघनसारघनसारसन[5]तारजनसंवृते ।
हूतपुरहूतपुरधूतवरचूतभरलो[6]भवान्
देव बलदेवबल देवतरुरेव तरुणो भवान् ॥

वीरविरुदम्

[२६]

कविकुलकुवलयकुसुमकलाकर
करतलकलितकुरुचिकमलाकर ।
मदगजमुदित महितमहिमण्डक
मणिमयमुकुरमसृणमृदुगण्डक ॥

शुचिरुचिरुचिरचिकुरचयचामर
चटुचरचरणचलनचकितामर ।
यमसमसमरसृमर सुरसुन्दर
वरसर सरसरसन[7] लसदिन्दिर ॥

---

१. °लिकुल° । २. °यत° । ३. °तुङ्गात° । ४. °टङ्का° । ५. °सर° । ६. °तरलो° । ७. °लसन ।

शतशित[1]सितशरशरण शुभोदय
शरदुरुशशधरसकलयशोमय ।
जयनय[2]निलय मलयतरुशीतल
सुसमयहयरय[3]सभयमहीतल ॥
कान्तकलिका

[२७]

त्वद्दोर्द्यत्प्रतापद्युमणिपरिचयादप्यनापन्नहानो
भिन्दानो वन्दिवृन्दाननकमलवनं दारुणः कैरवाणाम् ।
त्वज्ज्योत्स्नावीचिनीचीकृतनिखिलयशःक्षीरको वीर कोऽयं
क्षोणीजाने न जाने विहरति जगति त्वद्यशोऽनुण्णशोचिः ॥
शूरश्लोकः

[२८]

रङ्गमुसङ्गम पङ्गविहङ्गमतुङ्गतुरङ्गम[4]भङ्गिभुजङ्गम
सङ्गरमङ्गल भङ्गुरसङ्गलचञ्चलचञ्चलकुन्तलकुन्तल[5]
मञ्जुलमण्डल वञ्जुलकुण्डल दण्डनपण्डित मण्डनमण्डित ।
वीरविरुदम्

[२९]

जय जय दलदरविन्दवृन्दनिन्दोचितलोचन
मणिगणकिरणकदम्बलम्बसंवर्धितरोचन ।
करिकुलकुलिशदुरन्तदन्तसन्तक्षणसक्षण
रणवनविपुलविपक्षवृक्षविक्षोभविचक्षण ॥

जय जय निजभुजदण्डचण्डकण्डूलशरासन
कृशतनुकुत्त्वकरिकुम्भलम्भसम्भोगविभावन ।
हिमहिमकरहरहारतारकोदारयशोमय
धरणिधरणधनधीरवीर गम्भीरगुणोदय ॥

जय जय विजितनृपालिपालिसम्पालितपादुक
मदकलकलभपलाप[6]शापसापत्न्यदवाचिक ।

---

१. °शित° । २. °जननय° । ३. °चय° । ४. °विहङ्गम° ।
५. °कुण्डलचञ्चलकुण्डल° । ६. °कलाप° ।

चलतरचतुरतुरङ्ग तुङ्गशृङ्गारिमतङ्गज
रतिरसरभसविलोलगोलरोलम्बदृगम्बुज ॥
कान्तकलिका

[३०]

मातङ्गश्रुतिवातशोषितशचीशृङ्गारपत्रावली
बाहव्यूहविलोलधूलिमलिनब्रह्मासनाम्भोरुहि ।
प्रस्थाने तव भेरिभैरवरवव्यालोलसप्तार्णव-
क्लृप्तावस्थितिवैपरीत्यविपदि व्यस्तं समस्तं जगत् ॥
शूरश्लोकः

[३१]

जय परवारणकटतटतालक
जय परवारणभुजविजितालक ।
जय बहुधारण वरतरलालक
जय बहुधा रणखरशरलालक ॥
वीरविरुदम्

[३२]

महिवरुण मरुदरुण परतरुणकरकरुणकृतचरणयुगभरण जितकरण सित[1]शरण जयशरण भयहरण कलितरण ललितरण रणकरण कनकरणदसिवरण पटुभरण पटहरवपटलनवघटितदवधरणिभवनिलय भववलयस्तवदमितद्रवदमृतनवभणित[2] भवदहितशवरुधिरजवरचितयव सदवयव यमितयवन सरलवल[3] सविभव गुणगणवदुरुपणवनमदमर समसमर ततसमरकतचमर चलचिकुरमणिमुकुरविधुमधुर मधुविधुर बहुखपुरसुमुखपुर तरणिखरकरनिकरललितशरदलितपरतिमिरभर भिदुरकरविदुरवर द्विरदकरमुदिरवरगमितदर नमितनर समितिशरदमृतकरधमित[4]धर समितचर गिरिकुहरविरविहरदरिनगर नलसगरसुकृगवरशुभग[5]तर ।
कान्तकलिका

[३३]

भेरीभाङ्कारभीत्या परिहरति हरिच्चण्डवेतण्डगण्डी
रम्भावक्षोजकुम्भावनुसरति जलं भावसम्भावनेन ।

---

१. शित°. २. °तुलित. ३. °वर. ४. °रमित. ५. सुभग°.

भूमीकन्दर्प दर्पात् त्वयि चलति सति द्वेषियोषा सरोषा
विश्लेषात् पत्रलेखामपनयति मुदा चित्रलेखा तनोति ॥

शूरश्लोकः

[३४]

खर्वखलगर्व चलसर्वबलदर्वबल मर्वमलपर्वतलतर्वनल शर्वबल ।

[३५]

विधिरिव चरणतलागतविपक्षमोदक्षमो न परपद्मोपपन्नस्थितिः, हरिरिव हिरण्याक्षविक्षेपदक्षो न रक्षोभीतिहरः, शङ्कर इव सम्मीलितचक्षुःश्रवा न वामीकृत-कान्ताजनः, पाकशासन इव विविधविद्याधरविबुधबद्धादरो नास्थाने गुरुग्रहधरः, निशाकर इव शिलीमुखमुखविखण्डितकैरवपत्रो न त्रोटितमित्रोदयः, रविरिव तरुणप्रतापविपोथित-पृथ्वीधरो न रोचिरुच्चाटितकुमुदामोदः । मन्ये देव एव केवलं जनवञ्चनाय किञ्चिद-न्यथाभूतः । सकमलोऽपि न सतामरसोऽजनतापकारको नापि न तापकारकोऽनलसमा-नोऽपि न नलसमानो भवान् ।

[३६]

जय जय कलिकर्ण कर्णद्वयीताण्डवाकाण्डपाण्डिरयसण्डीनगण्डालिनीडिण्डिमा-डम्बरोड्डामरोदश्चदण्डीरशुण्डीशहिण्डीरपिण्डीसुखण्डीकृतोद्दण्डशुण्डातरण्डाजिखण्डाब्धि - हिण्डत्सचण्डीशचामुण्ड दोर्मण्डलीचण्डलीलोढगण्डस्थलीकुण्डलीभूतकण्डूलकोदण्डलीनोरु-काण्डप्रचण्डाहितुण्डावलीढारिचण्डालरुण्डाढ्यमुण्डावलीमण्डिताजाण्डभाण्ड स्फुरत्पुण्डरी-काक्षदण्डप्रणाम क्षमःमण्डलाखण्डलाखण्डगाण्डीविचण्डीशिखण्डीशकाण्डीरवेतण्डमार्त्त-ण्डवैतण्डिक क्षोणिपालालिबालामिलन्मौलिमालामणिव्रातबालातपालालिताङ्घ्रिप्रवाला-न्तरालाकरालामृतालाप हालापकालातिकालाहिजालाहितालानताला[1]रक्तशालाटविप्रो-ल्लसल्लाभनिर्लास्यसल्लाट भल्लाटमल्लाटनोल्लासनोल्लाघतल्लापतल्लाजवल्लातहल्लात मल्लातिमल्लामृगोल्ला[2]सुहल्लाजफुल्लासिवल्लावसल्लाघवायातवित्र।[4]तरि त्वय्यशङ्का मही मोदते ।

कान्तकलिका

[३७]

कृत्वा नृत्यमधित्रिलोकि कुतुकात् त्वत्कीर्तिसन्नर्तकी
यद्भूमण्डनगण्डनानि मुमुचे सुव्यक्तमद्यापि तत् ।

---

१. °नीलो°. २. °लिताला°. ३. °सृगोल्ला°. ४. °वाधातरि त्रा°.

ग्रैवेयं गगनापगा मणिमयो हारश्च ताराचयः
कौन्दं दाम तुषारधामवलयो नीलं वितानं नभः ॥

शूरश्लोकः

[३८]

कमलपलाशक्षपितपलाशक्षतजपलाशक्षरदखिलाश स्मितनवकाशस्फुरदवकाश त्रिदशनिकाश प्रणयविकाश प्रतिगजनाश प्रचितजनाश[2] ।

वीरविरुदम्

[३९]

चलति त्वयि रङ्गादपि चतुरङ्गानमितभुजङ्गाधिपतिफणम् ।
विदलति भृशमुर्वी शतगुणगुर्वी शिव शिव खर्वीकृतकमठम् ॥

चिरतरमतिकम्पादनुकृतशम्पानिजकलसम्पाटितशिरसः ।
प्रतिभूपतिदारा विगलितहारा घनजलधारावलितदृशः ॥

च्युतचिकुरकलापा विहितविलापा जघनतलापाकृतरसनम् ।
प्रविशन्ति गिरीणामपगतचीना भयभरदीना गहनवनम् ॥

प्रविशति बत लङ्केशितुरपि शङ्के सचकितमङ्के कमलमुखी ।
किमपरमिह जम्भाहितपरिरम्भादपि सुखलम्भा दिवि न शची ॥

करविगलितपद्मा मृगयति पद्मा दिशि दिशि पद्मायतनयनम् ।
भयगद्‌गदवाणी भजति भवानी सपदि हिमानीकरतिलकम् ॥

हरितोऽपि हयाली खरखुरपाली खुरलिकरालीकृतरजसा ।
निह्नुवत इवालं रविकरजालं दयितमनालम्बितरभसा ॥

कान्तकलिका

[४०]

शैनेयो नाभिनेयो गुरुरगुरुरसौ नापगेयोऽपगेयो[3]
राधेयो नाभिधेयो न खलु हरिहयो हैहयो नेह योग्यः ।

अन्यत् किं सज्यमाधुन्वति भवति धनुर्दण्डमुद्दण्डमुद्यद्-
गाण्डीवग्रन्थिगण्डस्थलमपि गणये पाण्डवं पण्डमेव ॥

शूरश्लोकः

---

१. °लव°. २. °प्रतिजननाश. ३. °गेयोऽपि गेयो.

[४१]

दोषापतिमुख दोषाहतिमुखदोषारतिसमदोषापतिसमयोषामतिपरिमोषाकृति-परितोषानत[1]परिपोषानतगिरिकोषागतपरशोषाततशर ।

वीरविरुदम्

[४२]

जय नृपनन्दन वनजितनन्दन हरिकृतवन्दन[2] परिधृतचन्दन वितर नवं धनमयमनिबन्धन मुरु[3]मणिबन्धन खलजनबन्धन परपुरभञ्जन[4] गुणिगणरञ्जन भय-भरभञ्जन मुखसुख सज्जनविजयविजृम्भण गुणपरिरम्भण सुखमुपलम्भन घनपरिरम्भण मधुमधुरम्भणरसलसदङ्गन भसलसदङ्गण परतरटङ्गनगणरणरिङ्गण कमलविलम्बक सुभगसदम्बक युवतिकदम्बकमुखविधुचुम्बक महितलमण्डक परभटभण्डक कुचरित-दण्डक सुचरितपण्डक गजमदमोचक रतिरसरोचक सुललितलोचकनयननिकोचक अरिकरिदारक कटतटदारक विदितविचारक विमत[5]निवारक वसनविसारक बहुकृति-कारक रदजिततारक सदजिततारक ।

कान्तकलिका

[४३]

कर्णस्वर्णविभूषणारुणमणिश्रेणिश्रियामाश्रया-
दीषद्दर्शितशोणशोचिषि दृशोः प्रान्तेऽतिकान्ते तव ।
सानन्दं समुदेति देव परितः पौरन्दरे मन्दिरे
दिव्याना[6]मरविन्दसुन्दरदृशां मन्दारदामोद्यमः ।।

शूरश्लोकः

[४४]

तुङ्गश्रोणीमुखविधुमधुरमधुव्रत रङ्ग[7]क्षोणीखलदलदलनघनव्रत ।
शम्पालोलालकरुचिरुचिरविलोचन चम्पाचोलाधिपकचनिचयविमोचन ।
फुल्लन्मल्लीविचकिल[8]वकुलविचक्षणवेल्लद्वल्लीवलयितविपिनवरक्षण[9] ।।

वीरविरुदम्

[४५]

चलति त्वयि कालोपमकरवालोपालोकनरसरभसवति ।
करतालितभालो विगलितमालो मालो गिरितटमनुसरति ।।

---

१. °तोषानति. २. °चन्दन. ३. वितरणबन्धनमरु° ४. वरगञ्जन. ५. विमति°. ६. मन्दाना°. १. वङ्ग° । २. °विचिकिल° । ३. °विचक्षण ।

करकलितकपोलो भयभरलोलो रोलो विलपति किमिदमिति ।
शल्लित[1] इव चोलो विलुठितचोलो दोलोदितमतिमति भवति ।।
चलदलचलदङ्गो वलदभिषङ्गो वङ्गो भङ्गुरवरयुवति ।
परहृतचरतुङ्गो[2] विमुषितरङ्गो गङ्गोदरदरमनुविशति ।।
चिरतरमातङ्काकलितकलङ्का लङ्का जलनिधिमधिचलति ।
मगधेषु सशङ्का वपुषि भृशं काऽलङ्कारं वत विरचयति ।।
शिव शिव सौवीरा अपि वरवीरा भीरा विसदृशमभिदधति ।
परिकल्पितचीरा वपुरपि कीरा हीरा बलिवलितं जहति ।।
विनिधाय सदारा विसरदुदारासारा[3] निजकरभरमुरसि ।
विदधति ताहारा विदलितहारा हारावं हिमगिरिशिरसि ।।
केशायितकेशा विघटितदेशादेशा दिशि दिशि दशनमधि ।
तृणमिह वसुधेशा विरहितवेशा वेशा बिभ्रति नतिरवधि[4] ।।

कान्तकलिका

[४६]

क्षिप्रोत्क्षिप्तक्षुरप्रक्षितिभृदतिभृशक्षोभितक्षत्रवीर-
क्षीरोदक्षोदकक्षोदयदमलयशोऽनुक्षणक्षालितद्योः ।
मन्ये वैपक्षपक्षक्षयनयनसुखः स्वर्णलक्षाभिमोक्षा-
देकोऽसि क्षोणिरक्षोचितचरित सहस्राक्ष ऋक्षेशयक्षैः[5] ।।

शूरश्लोकः

[४७]

जय कल्याणविशारद शारदशशिकल्पानन पारदभारद ।
जय दन्तावलदन्तनिकृन्तन सुख[6]सन्तानचिरन्तनचिन्तन ।
जय नीहारनिवारणकारण रमणीहारविसारणचारण ।
जय सन्नादिभुजङ्गमजङ्गम जय सन्नादितुरङ्गमसङ्गम ।
जय भूपालकरालकलालक परभूपालकजालकतालक ।

वीरविरुदम्

[४८]

जय जय वन्दितवरकुरुविन्दवदनविनिन्दितशरदरविन्द ।
मनसिजसुन्दर सुखमनुविन्द गिरिवरकन्दरगतपरवृन्द ।।

---

१. शल्पि(ल्यि)त° । २. °चतुरङ्गो । ३. °रामारा । ४. न निरवधि ।
५. ऋक्षेनपक्षैः । ६. कृत° ।

परिनटदिन्दिरविलसदलिन्दमणिमयमन्दिर मिलितमिलिन्द-
मदगजनन्दितमलयकलिन्द परपुरनन्दितविपुलपुलिन्द ।।
गुरुभुजमन्दर तनुतरतुन्द विदलदमन्दरदनजितकुन्द ।
विरचितचन्दन गुणिगणकन्द सुभणितनन्दनवनमकरन्द ।।

कान्तकलिका

[४९]

खुरप्रस्फुरद्धूलिधारान्धकाराभिसारागताप्रातिभारातिपद्माः ।
खलीनावलीलास्यलीलावलीढत्रिलोकीतलोत्कीर्णसंकीर्णपद्माः ।।
स्फुटप्रस्फुटद्वैरिपक्षोरुवक्षोगलच्छोणितक्षोदज[1]क्षोभभाजः ।
कशालोककालोचिता[2]लोलटापच्छलाकारिताकामनाकाधिराजः ।।
पृथुप्रोथसञ्चारदम्भावलम्भादलं भामलम्भादिकं भावयन्तः ।
पदाघातसङ्घातसञ्जातवातैः समुद्रानपि द्रागुपद्रावयन्तः ।।
समस्तारिविस्तारिमस्तालिमेदस्स्रवत्स[3]र्पिरुत्सर्पिदर्पाग्निसङ्गे[4] ।
विपक्षावलावाष्पवृष्ट्यै वहन्तो बलादध्वरं दुर्धरं युद्धरङ्गे[5] ।।
हठादुन्मुखीभूय हेषाविशेषादनिद्रोदयद्रोमविद्रोहिभूपाः ।
चलत्कन्धरा वन्धुराबन्धराजी[6]भवत्केशरोद्देशरोचिष्णुरूपाः ।।
भ्रमन्तो नवं तोरणं तोलयन्तो धयन्तो नु सन्तोषयन्तो दिगन्तान् ।
अखर्वाजिगर्वादटन्तोऽपि सन्तो हसन्तो भृशं तोकमुन्मील्य दन्तान् ।।
करिष्यामहे किं नु भृ[7]त्याऽनसत्या नियत्या कियत्या भवत्याऽभिभूताः ।
इतीव क्षितीमानतीभूय भूयः क्रुधा ताडयन्तः पदाग्रैरुदग्रैः ।।
धरामीनकेतो दरामीलदक्षा[8]स्तवामी नवा गन्धवाहा नु वाहाः ।
नटन्ति स्फुटं तिग्मतीर्णप्रतिज्ञामुदेवाधिदेवाहवे गाढवेगाः ।।

शूरश्लोकः

[५०]

नीरधरधीरतर सीरकरवीर[9] वरचीर करवीरकर धीरपरहीरहर ।

वीरविरुदम्

[५१]

सलिलेषु निलीना दिनदिनदीना मीना इव गुरुशङ्कम् ।
कलयन्ति सपत्ना विगलितरत्ना रत्नाकरमपि पङ्कम् ।।

---

१. °क्षोदन° । २. °लोचिता° । ३. मेदःस्खलत्स° । ४. °सङ्गम् ।
५. °रङ्गम् । ६. °वन्धुराजी° । ७. करिष्यामि किं नाम भृ° । ८. °मीदन्ता° ।
९. °धीर ।

विदलन्ति समन्तादपि हरिदन्ता दन्तावलपदपातैः ।
प्रसभं च खलीना[1]कर्षणलीलाशीलायत[2]हयघातैः ॥
विनटति हसदालीपण्डितपाली काली करतलतालैः ।
फणितिलकफणाली फलमिव फालीफालीयति बलभारैः ॥
जय पादपमूलीभवदुरुधूलीकूलीकृतजलपूरम् ।
विमलध्वजफेना सरिदिव सेना ते नादयति विदूरम् ॥
द्रवदमरसुदृक्का दलति न दिक्का ढक्कानिनदविसारैः ।
पिदधत्यपि तारापतिमिह पारावारा लहरिविकारैः ॥
विरताखिलनृत्यीमृदुलमृदङ्गीसङ्गीतं मदघोषैः ।
कति सीदति व्रातं सुरकरिजातं सातङ्कं गजघोषैः ॥
कुसुमावलिवासावलितविलासावासा विसरदनङ्गम् ।
सुरसद्मनि बाला सुरतरुमालामालानयति सुरङ्गम् ॥
तरुणीकुचकुम्भाकृतपरिरम्भा रम्भागुणगणवित्ते ।
चलति त्वयि के वा भयमपि देवा देवा दधति न[3] चित्ते ॥

कान्तकलिका

[५२]

कन्या कीर्तिः प्रतापस्तव भवति वरो मेरुवेद्यामभिद्या-
मद्याप्येतौ समेतौ त्रिदशमृगदृशो वीर नीराजयन्ति ।
यद्भानुं देव दीपं दधि विधुवलयं घूर्णयन्त्यर्पयन्त्यः
स्वर्गङ्गावारिधारामुपरि च परितस्तारताराक्षतांश्च[4] ॥

गुरुश्लोकः

[५३]

नयनामितपर नयनामित परशयनाटितशरशयनाटितनर पवनाशनभुज दरना-
शनगज धवलासनशत नवलासनरत कमलाकृतिपद कमलाकृतिपद ।

वीरविरुदम्

[५४]

स्वासावासादभिकलनासादासायिततिल दुर्जनतर्जन ।
रासा[5] यासाकुलमुखकासारासादितसुख सज्जनमज्जन ॥

---

१. खलीला° । २. °शीलायित° । ३. च. ४. °क्षतानि. ५. वासा° ।

आसादासारितपर हासाभासाजितवरपारदनारद[1] ।
प्रासादासाधितरस प्रासाभाशायितलसदुद्भटसद्भट ॥
काशाभासादकयश आसारासाधुषु भृशदण्डनमण्डन[2] ।
नाशालासा[3]कुलितविलासावासाहितरविनीरद हीरद ॥
माराकाराधितधनभारा[4]दाराधितजन रञ्जन सज्जन[5] ।
पारावाराटविमय पारावारालय जयचन्दननन्दन ॥
चाराचारातुल घनसारासाराकुलघनसुन्दरमन्दिर ।
साराधारालितशर कारागारागतपर बन्धुरकन्धर ॥
तारादाराधिकरुचिहाराभाराजितशुचिहृत्तल सत्तल ।
आरामारादतिरतिधाराधारावनिपतिकुण्डलमण्डल ॥

कान्तकलिका

[५५]

संग्रामग्रामनामज्वलदसिदलितक्रामदामत्तदन्ति -
ग्रामण्यामुक्तमुक्ताफलफलितयशोवल्लिविश्रामवृक्षः ।
उद्दामस्थामधामस्थगितगतिकतिक्षामसामन्तवामा -
कामोत्थामोदवामो विहरति भवतो वीर बाहुप्रकाण्डः ॥

शूरश्लोकः

[५६]

धीरवादिश्रनीरवामित्रपण्डिता शेष पण्डिता[6]नेष चण्डक्षम्पासिदण्ड संपासि भूपते कामरूप ते नाम कस्य नोदेति पश्य नोदेति ।

वीरविरुदम्

[५७]

जय जय मलयनिलयतरुशील मणिमयवलयमलयशयनील ।
कुवलयकिसलयसमसुकुमार सहृदयसमुदयसमुदयसार ॥
अचकितचलितचतुरचतुरङ्गकृतफणिफलगणगहनविभङ्ग ।
बलवलदरिकरिमदसदनूपहरण तरुणातपतपनसरूप ॥
भणितजनितमधुमधुर धुरीण चतुरतुरगडगडगितमहीन[7] ।
नृपवनपवन जघनघनवान लसितहसितसितविततवितान ॥

---

१. °नादपरद । २. °मण्डलदण्डल । ३. नाशानाशा° । ४. °धिकधनतारा° । ५. रञ्जन सञ्जन । ६. मण्डितानेष । ७. °नदीन ।

अमलकमलदलतरलदृगन्त परमरमणिमणिगुणितवसन्त ।
समुचितविरचितखलदलदण्ड निजभुजभुजगविजितजगदण्ड ।।
नलिनमलिनकरचरणसुवेश नखरशिखरनमदमत[1]नरेश :
हरिपरिचरणशरण शुकलाप[2] गजबलतलमलदचलकलाप ।।
दशनवसनजितपरिणतविम्ब धनुरनुरचितकनकनिकुरुम्ब ।
मदकलमधुकरनिकरनिकुञ्ज मुखसुख जनुरनुगुणगुणपुञ्ज ।।
विशदलविशदललितशयनीय नयनवनयन वलनकमनीय ।
समरद समरदलितपरवीर शरदवसर[3]दवसर नृपहीर ।।
समुदितसमुदितसुजनविनोद महितलमहितलपितकृतनोद[4] ।।

कान्तकलिका

[५८]

दीर्यद्दन्तिघटाकटान्तरुदयन्मुक्तानुपक्तासृगा-
वर्तावेष्टितमुल्लसत्यसिलतामूलं करालं तव ।।
शङ्के शात्रवशातनाय शनकैः शृङ्गाटके तण्डुलैः
सिन्दूरैरपि चक्रपूरणमिदं चक्रे समिड्डाकिनी ।।

शूरश्लोकः

[५९]

बाणवशदानव शतामलस[5]मानलसमान पव[6]मान जवमानजयतानहय दान-
दयमान जय ।

वीरविरुदम्

[६०]

जय जय जगदवदानसमरसदान मसरसदानटदतुलहय ।
जय जय शिशिरवितानरुचिरवितानसुचिर[7] वितानविमतनिचय ।।
जय जय चलचतुरङ्ग चतुरतुरङ्ग विहितसुरङ्ग पिहितगगन ।
जय जय मृदितपतङ्ग मुदितमतङ्गदलितभुजङ्गमफणगहन[8] ।।
जय जय महिपुरुहूत चिकुरसुहूत सुघनकुहूतटतिमिरभर ।
जय जत भयपरिभूत जगदनुभूतबहुमुख[9] भूतलतिलकवर ।।

---

१. °दमित° । २. स्व(सु ?)क° । ३. °शरद° । ४. °मोद ।
५. शतानलस° । ६. °नवा° । ७. रुचिर° । ८. रणगगण । ९. °सुख ।

जय जय विनयविशेषविनमदशेषनरपतिशेखर मृदुचरण ।
जय जय जनपरिवेषपरमसुवेष तरुण रणे[1] खलदल[2]हरण ।।
जय जय दलितविरोधिवलितशिरोधिरुधिरनिरोधितसकलधर ।
जय जय सुरवरयोधिविशिखपयोधिसदृश वयोऽधिकविनतिपर ।।
जय जय सुललित[3]मालतरुणतमालगहनतमालयसविधवन ।
जय जय विचलदकालघनसमकालगतबहुकालधवलभवन ।।
जय जय विषमदशोन[4] यधुमदशोणकमलदृशो नवकुसुमशर ।
जय जय विलसति को न तव करकोणजितपरको[5] नयविनयधर ।।

कान्तकलिका

[६१]

युष्मत्कीर्त्तिप्रतापौ सुकृतिसमधिकौ वीक्ष्य विज्ञः पयोधौ
स्थाने जाने स निर्मज्जयति मुहुरिमौ पुष्पवन्तौ विधाता ।
धिक् त्वेतौ न स्थितौ यत् फणिपतिवडवावह्निवत् तस्य गर्भे
भूयो भूयोऽपि भूमीतलतिलक मुखं दर्शयेते जनेभ्यः ।।

शूरश्लोकः

[६२]

सिन्धुरचितमदसिन्धुरचितमद बन्धुरमणिरति[6]बन्धुरमणिरतिपण्डित जय जय-मण्डित जय जय ।

वीरविरुदम्

[६३]

जय परिभूतप्रतिरथसूत क्षितिपुरुहूत प्रतिपलहूतद्विषदुरुदूत[7] द्युतिपरिपूत प्रसरितचूत प्रगुणितभूत स्वयमनुभूतस्वबलविधूतप्रबलकूलूतप्रचलितलूत ।।

कान्तकलिका

[६४]

धरावसन्नपन्नगप्रसन्नसन्नटन्नखाः
कशाभृशाभिशापतापसिन्धुझम्पसम्मुखाः ।

---

१. रवे । २. °दार° । ३. विलुलित° । ४. °दशोण । ५. °ततकरको ।
६. मणितरति° । ७. °सूत ।

सुमेरुसानुसानुसानुबन्धजानुबन्धुराः
स्खलत्खलीन[1]बद्धलीलयुद्धशीलकन्धराः ।।
अखण्डचण्डमण्डलीसुकुण्डलीकृताननाः
खुराभिघातजातवातवारितारिकाननाः ।
अलं विलम्बिकण्ठचुम्बिचन्द्रचारुचामराः
पदङ्कटङ्कटङ्कृतिस्फुटस्फुटद्धराधराः ।।
समुद्रसङ्घलङ्घनाघृणाघनानतिक्रमाः
अपि त्रिविष्टपोपविष्टपोथने गतश्रमाः ।
तवाहवाजि[2]वाजिनो वरा[3]जिनोपरञ्जिताः
स्फुटन्ति भूभुज[4]ङ्गभोगिभङ्ग[5]योजितव्रताः ।।

शूरश्लोकः

[६५]

रक्ष रक्ष लक्षलक्षमेवमेव देव देवराजराजराजराज-
दङ्गदङ्ग रङ्गरङ्ग[6] चापचापलापलाप ।

वीरविरुदम्

[६६]

नन्ददमलकुन्दकमलवृन्दधवलमन्दिरे
मन्दविजयकन्दविनयनन्दतनयसुन्दरे ।
क्षीरहसित धीरललित वीरवलितकुण्डले
कीरवचन धीरनयन हीररदनमण्डले ।।
स्फीततरुण वीतहरिणशीतकिरणतल्पये[7]
पीतगगनगीतजवनभीतपवनसद्धये ।
रङ्गपरमसङ्गतरमतुङ्गतरमतङ्गजे
भङ्गविचलदङ्गविकलबङ्गनृपलसद्भुजे ।।
स्फारसघनसारजघनचारुवसनराजिते
सारभमलतार तरलहारवरलतावृते ।
दण्डदलितखण्डकलितपुण्ड[8]वलितपालये[9]
चण्डकरटिगण्डविकट[10]पिण्डविघटनोदये ।।
मालधरणिपालरमणिकालसमनिभालिते
भालफलकपालितिलकबालशशिकलायुते ।

---

१. °खलील । २. °वाज° । ३. नवा° । ४. भो भुज° । ५. °भङ्गि° ।
६. °रङ्ग सङ्गरङ्ग । ७. °तल्प ए । ८. °वण्ड । ९. °पोलये । १०. °विकटि° ।

हंसरमण[1] वंशशमन[2] कंसदमनचिन्तके
शंसफलवदंश कुलवतंस बलवदन्तिके ।।
कामकदनधामवदन दामकिरणमण्डिते
वामयुवतिभामविततिनामविहतिपण्डिते ।
सूपरचितधूपखचितकूपमुखितखेदिनी
भूप भवति रूपमवति यूपमयति[3] मेदिनी ।।
कान्तकलिका

[६७]

विद्धे केतुशलाकया रिपुकृते वक्षःक्षते भास्वतः
प्रस्थाने तव कर्णतालपवनं तन्वन्ति दन्तावलाः ।
आप्ता वाजिवराः करैरिव खुरैरायन्त्रयन्ति[4] व्रणं
धूलीवस्त्रमुपाहरन्ति जनतादृक्पातभीता दिशः ।।
शूरश्लोकः

[६८]

इन्दीवरदलसुन्दरलोचन वन्दीकृतरिपुगर्वविमोचन
मन्दीकृतनवनिर्मलरोचन सन्दीपितकुल पद्मविलोचन[5]
वन्दीरितविरुदावलिरोचन मन्दीकृतजनदुर्गतिशोचन ।।
वीरविरुदम्

[६९]

जय जय चपलतुरङ्गचतुरचतुरङ्गसमन्वित
जय जय नयनतरङ्गतरलतरवङ्गपतिस्तुत[6] ।
जय जय ललितललाटघटितनवहाटकनिन्दन
जय जय कमलकपाटपुटकपरिपाटकवन्दन ।।
जय जय दलदभिरामदमनदलदामसुबन्धुर
जय जय नवहिमधामधवलघन[7]धामधुरन्धर ।
जय जय चकितचकोरनयन मणिकोरकतोरण
जय जय कमलकठोरविमतचयतोरणधोरण ।।
जय जय धनुरनुरागधरणिपुनरागतराघव[8]
जय जय मणिपरभागसुभगकरभागरिभार्गव ।

---

१. °गमन । २. °रमण । ३. °मवति । ४. °रायन्तु यन्त्रि° ।
५. °विरोचन । ६. °पतिस्सु (स्तु?)त । ७. °धन° । ८. °लाघव ।

जय जय जितजगदण्ड भुजगभुजदण्ड सपण्डित
जय जय विमलसुगण्डफलकतल कुण्डलमण्डित ॥
जय जय मदनसुवेश विनयविनिवेशविवर्धन
जय जय निखिलनरेशरमणिघनकेशविकर्षण ।
जय जय खरकरवालदलितनरपालकपालक
जय जय जलरुहजालजयनमुख बालकलालक ॥
जय जय लसदवलोकसुखितनरलोक रणोदय
जय जय विदलदशोकचरण गतशोक यशोमय ।
जय जय सुकृतविपाकविहित[1]महिनाक गुणाकर
जय जय पिशुनत्वराकतिमिरवधराकनिशाकर ॥
जय जय मुदितमयूरमसृणमणिपूरविराजित
जय जय विजित[2]विदूरविनतवरशूरसभाजित ।
जय जय कमलसमानसहजलसमानशुभानन
जय जय विमलविमान विकटकुसुमानतकानन ॥

कान्तकलिका

[७०]

युद्धक्रुद्धमदान्धगन्धगजताविक्षेपचित्रं भव-
च्चारित्रं कलिकर्ण किन्नरकुलोद्गीतं शनैः शृण्वती ।
सद्यो भाववती भयाभिनयने भाग्येन सन्देशिता
पौलीमी पुलकान्विताऽपि पुरतः पत्युः परिस्फूर्जति ॥

शूरश्लोकः

[७१]

डिण्डिमचण्डिममण्डित पण्डितखण्डक
मुण्डकमण्डलदण्डल[3] हिण्डनमण्डन ।

वीरविरुदम्

[७२]

सुन्दराजिवाजिवृन्द कुन्दराजिहास
नन्ददिन्दिरारविन्दकन्दमन्दिरानन प्रभो ।

---

१. °पिहित° । २. विदित° । ३. °मण्डल ।

अङ्गरागराजमान सङ्गराजिरावदान
भङ्गरातिकम्पमानबङ्गराज रक्ष भोः[१] ॥

अञ्जनाकुमारसार गञ्जनाकुलारिदार
खञ्जनाभदृग्विहार कञ्जनालकोमलः ।

सिन्धुना समानदान गन्धनागसाभिमान-
बन्धनाधिकावधान किं नराधिपो नलः ॥

मन्दनीप[२]चारुदेह चन्दनीयदारुगेह
वन्दनीयमाधवेश नन्दनीचिमक्षमः ।

शिञ्जिनीपयोदपुञ्जकुञ्जनीतगुर्जरानु-
रञ्जनीयमञ्जुवैरिभञ्जनीयविक्रमः ॥

अङ्गुलीसुवर्णसङ्गपिङ्गलीकृतोरुरङ्ग
मङ्गलीयदुन्दुभिप्रसङ्गलीनदुर्जनः ।

कुन्तलीढदन्तिदन्त कुन्तलीदुरन्तचिन्त-
कुन्तलीकृतस्वतन्त्रकुन्तलीयकर्षणः ॥

तुन्दलोलकुन्ददामकुण्डलोरुचण्डधाम-
मण्डलोदयाभिरामगण्ड लोकसन्मते ।

किञ्च लोभनीयभावचञ्चलोभयीयभाव[३]-
दञ्चलोदिताखिलप्रपञ्चलोचनद्युते ॥

दिव्यतूण[४]शोणभाग भव्यतोरणा[५]नुराग
नव्यतोयदाभदान सर्वतो निरामयम् ।

सर्वतो दधातु[६] मोदमर्वतो महाविनोद
खर्वतोपनीतशर्व[७]पर्वतो भवानयम् ॥

कान्तकलिका

[७३]

ये पूर्वं केलिसौधे[८] कुशलतरसखीहस्तविन्यस्तसान्द्र-[९]
श्लक्ष्णश्रीखण्डपातादपि सपदि चमत्कृत्य शीत्कारमूहुः ।
त्वत्प्रस्थाने त एव क्षितिरमणमणे युष्मदारातिदाराः
पारावारोपकण्ठे पिदधति परितः पङ्कपूरैर्वपूंषि ॥

शूरश्लोकः

---

१. भो । २. °नीय° । ३. °धाव-° । ४. °तोण° । ५. °तोटका° । ६. °दगर्व° । ७. सर्वतोपनीतसर्व° । ८. °शैले । ९. °सार्द्र° ।

[७४]

जय जय गतभय सहृदयबहुदय किसलय-
समशय गुणमय सविनयमप[1]नयमपनय ।

वीरविरुदम्

[७५]

पण्डीभावगमितपरखण्डीकारललितशर
चण्डीनाथचरणचिरचिन्तनमन्त्रण[2] ।
दण्डीरासिदलितबलदण्डीरातिविदितबल
गुण्डीशानदशनदलदण्डन मण्डन ॥
भृङ्गीशालिसदतिघनसङ्गीतालिसुभगवन-
सङ्गी पालिपतितजनतर्जनवर्जन ।
बङ्गीजातनयनतटभङ्गी[3]घातनिपुणभट
रङ्गीभात[4]विविधनट नर्तनवर्तन ॥
कालीकालकलितकरतालीजाल[5]निनदशर-
शाली शालशयितपरसैनिक वैणिक[6] ।
तालीतालतरुणदवपालीपाल दलितनव-
मालीभालतिलकलव दैशिक वैशिक ॥
नारीहारिविमलमुख सारी धारिसदन[7]सुख
मारीचारिचरित सुषमापरमाकर ।
वारीदामदलित[8]गजभारी भामनमितकुल[9]-
नारीणामगणितभुज नागर सागर ॥
कङ्कालीढरुधिरमयपङ्कालीनविमतचय-
कङ्कालीयशकल जय काञ्चनभासन ।
शङ्काहीनचतुरखुरटङ्काधीनमधुरधुर-
लङ्का[10]पीनभयदतुरगाननमानन ॥
लक्ष्यालक्ष्य[11]दलितखल रक्षादक्ष विजितनल
भिक्षाभक्षसुखद बलखर्वितपर्वत ।
शिक्षावृक्ष नृपतिगणपक्षापक्ष परमधन-
यक्षायक्षगणितगुण[12]गर्वितनिर्वृत ॥

कान्तकलिका

---

१. °मव° । २. °यन्त्रण । ३. °भृङ्गी° । ४. °तात° । ५. °ताल° । ६. वैनिक । ७. °मदन° । ८. °दानदमित° । ९. °कुज° । १०. °रङ्का° । ११. लक्षालक्ष° । १२. °पक्षगुणितगण° ।

[७६]

चोली चोलमपाकरोति चपला माली मृणालीयते
नेपाली नृप लीयते न लभते निद्रामपि द्राविली ।
कुञ्जे गुञ्जति गुर्जरी गिरिदरी[1]गर्भे विदर्भेश्वरी
कौवेरी शवरीव भाति भवतो भेरीरवैर्भैरवैः ॥

शूरश्लोकः

[७७]

कुञ्जरपञ्जरभञ्जन रञ्जन बन्धुरकन्धर
निर्धनवर्धन शङ्करशङ्कर सज्जनमज्जन[2]
मन्दरसुन्दर दुर्जनतर्जन कङ्कटशङ्कट
निर्णयनिर्णयमुद्भटसद्भट[3]मर्दयमर्दय ।

वीरविरुदम्

[७८]

गजगण्डकरण्डगलन्म[4]णितण्डुलमण्डलमण्डितदिग्भवना
समिदन्धकबन्धविवर्तविवर्तनवर्तुल[5]कौतुकिदेवगणा ।
रुधिरोदविलासपलासविकाशनिकाशदुरासदभूपरिधिः
करिकुम्भतटत्रुटितामरचामरतामरसातिरसाजलधिः ॥
सहसैव समिद्धसमुद्धतसद्धयनद्धनिरामयरेणुधना
दलितद्विपदन्तदुरन्तनिरन्तरवह्निविवर्तित[6]वैरिवना ।
तरवारिहतारिविसारिबमूचयचुम्बनचिक्कणधोरणधूः
प्रियसङ्गमरङ्गतरङ्गदनङ्गसुवेशसुरेशक[7]वेशवधूः ॥
निपतन्नृपकोटिकरोटिसुचर्वणसर्वसगर्वशृगालखगा[8]
चलचापकलापप्रतापहुताशहठाहुतबाहुजबाहुयुगा ।
समुदस्तसमस्तधराधिपमस्तनिरस्तविहस्तमहस्तरणिः
तव भाति पुरन्दरसुन्दरमन्दिरसङ्गररङ्गमयी धरणिः ॥

कान्तकलिका

---

१. °दली° । २. °सज्जन । ३. °सद्भटमुद्भट° । ४. °मिलन्म° । ५. °वर्णन° । ६. °विवर्णित° । ७. °दिवेशय° । ८. °खगाः ।

[७९]

अद्धा युद्धातिवृद्धा[1]दरतरलतरस्कन्धबन्धप्रधानाः
कुर्वाणाः कर्ण[2]बाणा इव परपृतनाघातनायन्त्रणानि ।
लक्ष्मीलीलानुरूपं[3] खुरदलितधरा धूलिधूपं धुवन्तो
धावन्त्येते धरित्रीधरतिलक भवत्सैन्धवा गन्धवाहाः ॥

शूरश्लोकः

[८०]

बन्धुशरण[4] सन्धु[5]तरण पङ्गुपवन तुङ्गभवन
कुन्दरदन मन्दमदन जम्भदलनपद्म यजन[6]सद्मनयन ।

वीरविरुदम्

[८१]

जय जय देव क्षितिबल[7]देव क्षितिपतिलक्षसुरक्षितसेव
जय जय लेखप्रभुसमरेखप्रबल[8]तुरङ्गमभङ्गुरशेप ।
जय जय भूदस्तुतभुजयूप स्मितघनसारविसारसुरूप[9]
जय जय कल्पक्षितिरुहकल्प स्खलित[10]सुधारसु[11]धारसुजल्प ॥
जय जय तारदिविषदु[12]पहारद्युतिमयहर्म्य हिरण्मयहार
जय जय कालप्रभकरवाल स्फुरितमदालसमालतिमाल ।
जय जय दानस्फुरदवदान प्रतिहतदर्पकदर्पवितान
जय जय वीर प्रकृतिगभीर प्रतिभटपुञ्जितकुञ्जकुटीर ॥
जय जय शीतद्युतिमुख गीतध्वनिकलकोकिलकण्ठ विनीत
जय जय कामप्रतिबल कामप्रद खरदूषणखण्डनराम ।
जय जय चापध्वनिपरितापप्रसरदमित्रकलत्रविलाप
जय जय रङ्गद्रुतबहुरङ्ग सुनयनसङ्गकुरङ्गकुरङ्ग ॥

कान्तकलिका

[८२]

त्वत्प्रेङ्खत्पारशीकप्रखर[13]खुरपुटीखण्डनोद्धूतधूली-
धारालिप्तेन्द्रनेत्रावलिगलितजलैर्याऽऽलवालस्य पूर्तिः[14] ।

---

१. °ह्द्या° । २. कर्म । ३. °स्वरूपं । ४. °तरण । ५. °सिन्धु° ।
६. °जयन° । ७. °तल° । ८°. °प्रभसमवेष प्रचल° । ९. °सरूप । १०. स्थगित° ।
११. °रस° । १२. °द्युसदु° । १३. °प्रकर° । १४. °लैरासयाऽऽवालपूर्तिः ।

साऽपि क्लेशाय जाता बहलफलकरी कल्पवृक्षस्य युष्मद्-
दानव्यर्थस्य राजन् विमतिमति विधौ सम्पदव्यापदेव ॥
शूरश्लोकः

[८३]

नलिनमलिनकरणचरण पवन[1]लवनयवनधुवनजघनपवन ।
वीरविरुदम्

[८४]

इन्दिरावलित वरमन्दिराकलितहर
मन्दराभिहित[2]धरकन्दरानिहितपर ।
मन्दराजगणगुण कन्दरावणवचन
कुन्दराजितरदन सुन्दराजितवदन ॥
कन्धराधर[3]वलय कन्धरावलन[4]जय
बन्धरावितमहिप गन्धरासित[5]मधुप ।
सिन्धुराधिपतिमद सिन्धुराजकभयद
बन्धुराधिकधरण बन्धुराजित[6]चरण ॥
गुर्जरा[7]धिपतिवरकुञ्जराहननशरपुञ्ज[8]
राघवसदृश कुञ्ज[9]राजिषु सरस ।
पञ्जरागतशकुन कुञ्ज[10]रावलितरण
पिञ्जराकृतिवदन कञ्जराजितनयन ॥
कान्तकलिका

[८५]

परवारणवारणतारतरं रतरङ्गतरङ्गदनङ्गरसं
गरसङ्गिकलम्बकदम्बशिखं वशिखञ्जनगञ्जनसन्नयनम् ।
नयनन्दित सुन्दरकुन्दरदं दरदण्डितखण्डितराजबलं
जवलम्भितसम्भ्रमभूवलयं वलयन्त्रितकुन्तलकुन्तलवम् ॥
तलवद्धमनोरथवैरिपुरं रिपुरञ्जितपादसरोजनवं
जनबन्धुरबन्धुरसं रमणीरमणीयमनोजमनोरथदम् ।

---

१. °चरणशरण पवन° । २. °भिहृत° । ३. °रादर° । ४. °तलब° । ५. °राशित° । ६. °राधित° । ७. कुञ्जरा° । ८. °पुञ्ज° । ९. °पुञ्ज° । १०. °कञ्ज° ।

रथदन्तुरितावनि[1] चक्रमनुक्रमनुन्नमहीनमहीनभुजं
न भुजङ्गवृतं न च दम्भरतं भवतं[2] नवमर्णवमर्णवलम् ॥

नवलम्पटकङ्कटवद्भटमुद्भटमुद्भवदद्भुतसद्भवनं
भवनन्दनवन्दनकन्दमयं दमयन्तमनन्तमसन्तमलम् ।

तमलङ्कृतमित्रमहामहिपं महिपङ्कजमापरिभाविपदं
विपदन्त भवन्तमवाप्य धराऽप्यवरायितनाकतला[3] रमते ॥

शूरश्लोकः

[८६]

सुभगमुकुटतटमण्डितमहितल तरलतुरगखुरखण्डितरिपुबल
विजितभुजगभुजभञ्जितभयभर ललितगदित गतगञ्जितगजवर
मणिकरनिकरकरम्बितगृहचय कलिवलितुलितविलम्बित जय जय ॥

वीरविरुदम्

[८७]

दरतुङ्गतुङ्गमृदङ्गगुङ्गुमभङ्गिचङ्गिमगाहिनी
सुयुबत्युरोरुहमत्सरोरुहसत्सरोरुहवाहिनी ।
कचदिव्यसौरभनव्यगौरवभव्यपौरवधूवृता
किमकम्पकाननचम्पकानन[4] झम्पकारिमधुव्रता ॥

गजगर्वतापितखर्वतापित[5] पर्वतानति[6] कुर्वती
शरदभ्रसुन्दरशुभ्रमन्दिरविभ्रमं दरबिभ्रती ।
अनिशं धुतामरसिन्धुचामरबन्धुडामरकेतना
घनधूमवर्तितधूप[7] वर्तितरङ्गनर्तितबर्हिणा ॥

परहृद्विपाटकसत्कपाटकयुग्मनाटकमण्डिता
रिपुभूतसत्पुरुहूततत्पुरहूतितत्परतां गता ।
अरविन्दिनीदलवन्दनीयसदिन्द्रनीलसुजालिका
मणिजातशोभि[8] निजाततोङ्गसुजाततोरणमालिका ॥

रिपुराजखण्डितदाजिपण्डितवाजिमण्डितमण्डला
शिशुकुन्दकोमलकन्दुकोदयदिन्दुकोटिकुतूहला ।

---

१. °वलि° । २. भरतं । ३. °तुला । ४. °कानल° । ५. °नुत° ।
६. °नपि । ७. °धूपवर्तितरङ्ग° । ८. °तोपि° ।

अलकेशवेशनिवेशपेशलदेशदेशलसन्नरा
विजरीहरीति चिरं निरीतिरियं पुरी तव सादरा ।।
कान्तकलिका

[८८]

सौधे सौधे सुधांशुः समुदयति सरोजातसञ्जातसङ्गो
हट्टे हट्टे हिरण्यावनिधरशिखरे तारकाः प्रोल्लसन्ति ।
मूले मूले तरूणां तरुणा[1]यति तलि[2]त्तालहिन्दोललीलां
को वै तस्या वयस्याममरपतिपुरीं बर्बरोऽपि ब्रवीतु ।।
शूरश्लोकः

[८९]

जय रतिरमणदमन रिपुखण्डन निरुपम धरणिरमणिमणिमण्डन।
गजगणगहनदहनदहनोदित तरुणवरुण घनविनयविनोदित ।।
अरिपरिचरितचरणसरसीरुह मृदुपरिपरिणमदमरमहीरुह ।
खलदशवदनकदनरघुनन्दन सहृदयहृदयहरणहरिचन्दन ।
अमरसमरसमरणकृतडम्बर हयखरनखरशिखरदलदम्बर ।।
वीरविरुदम्

[९०]

चिकुरमुदिरचयरुचिर कमलजय-
कुशलवदनमयहिमकरवलये ।
चरणपटिमपटपटितकटकतट-
तरलसरलसटसमुदितसुहये ।।
नृपतिविततिरण[3]विपुलविशिखफण-
सुभुजभुजगगण विशरणरसिके ।
वदनकमलवलदभिनवविसदल -
विलस[4]दलिकतलमलयजतिलके ।।
द्विरदजलदमदसलिलनिविलनद -
निवहविहितपदसुललित[5]विहगे ।
गुरुतरमणिसर मुदितमधुपभर-
मुखरशिखरकरसरसिजसुभगे ।।

---

१. तरण° । २. तडि° । ३. °वन° । ४. विकस° । ५. °विहित° ।

चरणशरणगतरिपुनृपशतशत -
मुकुटकिरणतत बहुरसवचने ।
चकितहरिणसमपरमतरलतम -
ललितवलितसम[1] सुविततनयने ॥

रभसविदलदरिविसर[2]रुधिरसरि -
दसमसमरपरिचितमहिमहिले ।
नृहरिनखरखरघनतरशरभर -
विदलदसुरवर[3]समरिपुपटले ॥

विनति[4]शमितशुचिसुचिररुचिररुचि
विनयनिचयशुचिनमुचिभिदुपमे ।
धनुरिह मतिमति भवति वहति सति
विशति गहनमरिततिर्[5]रतिसुषमे ॥
कान्तकलिका

[९१]

युष्पद्बाहुसुवर्णपादपवरावष्टम्भसम्भाविता
भूमीपाल तमालवल्लिसुभगा निस्त्रिंशवल्ली तव ।
चित्रं शत्रुकबन्धरन्ध्ररुधिराण्यास्वाद्य सद्यःक्षर-
त्क्षीराकारमुदारकीर्तिसुमनःसम्भारमुन्मुञ्चति ॥
शूरश्लोकः

[९२]

अर्चितहरिहर आस्कन्दितपर इष्टजनावक ईहितभावक ।
उन्नतकन्धर ऊर्जितसिन्धुर ऋणकणखण्डन ॠभवमण्डन ॥
लृचरणसेवन ॡचितसद्गुण एलाकानन ऐहिकमानन ।
ओषधिपतिसम औरसकृतदम अन्तरुदितकृप अःकारितनृप ॥
करकृतसायक खलभयदायक गणपतिसुन्दर घनतरमन्दिर ।
ङचयसुर[6]समय चलदतिरयहय छलबलगञ्जक जगदनुरञ्जक ॥
झरपिबपरजन ञसमर्पितधन टङ्कितपण्डित ठक्कुरमण्डित ।
डमरुरवादृत ढणढणिताहित णहतविपल्लव तलजितपल्लव ॥

---

१. °रम° । २. °सरस° । ३. °भर° । ४. °नत° । ५. गग (ह) नत-
तिमरि° । ६. °सर°. ।

थतटाहृतगज दलितरिपुव्रज धर्षितदुर्मद नतजनशर्मद ।
परमसभाजित फलकविराजित बलजितसैन्धव भटनट[1]बान्धव ।।
मधुरिमलक्षण यतिरतिरक्षण रणरिङ्गितरथ ललितलसत्कथ ।
वलितविलोचन शत्रुविरोचन षष्ठिसुवत्सर संच्यु[2]तमत्सर
हलधरसमनय क्षमतम जय जय ।।
अक्षमालावि[3]रुदम्

[९३]

जीव श्रीवर[4]वीर वत्सरशतं प्रत्यर्थिपृथ्वीपति-
प्राणप्रीणनपीनपन्नगपतिप्रस्पर्धिकौक्षेयकः ।
किञ्चोच्चैरचलाचि[5]तेयमचला यावत् कलावत्कला-
नीहारद्रवहारविद्रवपटुस्त्वत्कीर्तिरुत्कीर्त्यताम् ।।
आशीः

[९४]

श्रीविश्वेश्वरमिश्रतः कुमुदिनीदेवी कुमारं कुला-
लङ्कारं समवाप यं गणपतिं गौरी गिरीशादिव ।
दौहित्रोऽच्युतठक्कुरस्य कृतिनः श्रीहारिताऽन्वयः
श्रेष्ठोऽसौ रघुदेवबालककविर्वैदेहभूमण्डनः ।।

[९५]

विद्याहृद्यमुखं महीपतिमथ श्रीबुद्धिनाथं ततो
लक्ष्मीदेवकुलाधिदेवमहितं श्री[6]मोहनं मोहनम् ।
नत्वा श्रीहरिदेवदेवजनुषं ज्येष्ठं वयोभिर्गुणैः
कृत्वेमां विरुदावलीमिह सदानन्देऽनुजे न्यस्तवान् ।।
इति श्रीमहामहोपाध्यायपण्डितराजविश्रुतश्रुतिधरबालककविमैथिल-
श्रीरघुदेवसरस्वतीविरचिता विरुदावली
समाप्ता[7] ।

---

१. °पटु° । २. सच्यु° । ३. °लावीरवि° । ४.° धर° । ५. °लायि° ।
६. °हितश्री° । ७. इति श्रीमैथिलरघुदेवमिश्रकविपण्डितेन्द्रविरचिता विरुदावली समाप्ता । श्रीराधामाधवचरणारविन्दद्वन्द्वं भजे ।

JAHĀNGIRA-VIRUDĀVALĪ

Edited by

Dr. Jagannath Pathak

This a companion volume to the present Virudāvalī. It is written by Pt. Harideva Miśra, the elder brother of Pt. Raghudeva Miśra and seeks to eulogise the great Moghul emperor Jahangir (1606-1627 A.D.). The author was a contemporary of Jahangir and enjoyed his favour. The work is composed in an ornate yet vigorous language, set in long metres with sentences full of long-drawn compounds. Though embedded in an age old tradition, the work is unique in possessing cadence and metres not found in Sanskrit. Its importance lies in its being one of the best specimen of its type and also because it is composed by a poet who himself belonged to a royal family of Mithila.

Pp 14+52 Price Rs. 5.00